# shrI mUkAmbikA stotra

# શ્રીમૂકામ્બિકાસ્તોત્રમ્

## Document Information

Text title : Shri Mukambika stotra

File name : mUkAmbikAstotra.itx

Category : devii, otherforms, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : P. R. Ramamurthy, Shree

Proofread by : P. R. Ramamurthy, Shree

Description-comments : Mookambika Stotra

Source : https://www.kamakotimandali.com/stotra/mukambastava.pdf

Latest update : August 3, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીમૂકામ્બિકાસ્તોત્રમ્

મૂલામ્ભોરુહમધ્યકોણવિલસત્ બન્ધૂકરાગોજ્જ્વલાં
જ્વાલાજાલજિતેન્દુકાન્તિ લહરીં આનન્દસન્દાયિનીમ્ ।
હેલાલાલિતનીલકુન્તલધરાં નીલોત્પલાભાંશુકાં
કોલ્લૂરાદ્રિનિવાસિનીં ભગવતીં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૧॥

બાલાદિત્ય નિભાનનાં ત્રિનયનાં બાલેન્દુનાભૂષિતાં
નીલાકારસુકેશિનીં સુલલિતાં નિત્યાન્નદાનપ્રદામ્ ।
શઙ્ખચ્ચક્રગદાऽભયં ચ દધતીં સારસ્વતાર્થપ્રદાં
તાં બાલાં ત્રિપુરાં શિવેનસહિતાં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૨॥

મધ્યાહ્નાર્કસહસ્રકોટિસદૃશાં માયાન્ધકારસ્થિતાં
માયાજાલવિરાજિતાં મદકરીં મારેણ સંસેવિતામ્ ।
શૂલમ્પાશકપાલપુસ્તકધરાં શુદ્ધાર્થવિજ્ઞાનદાં
તાં બાલાં ત્રિપુરાં શિવેનસહિતાં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૩॥

સન્ધ્યારાગસમાનનાં ત્રિનયનાં સન્માનસૈઃ પૂજિતાં
ચક્રાક્ષાભયકમ્બુશોભિતકરાં પ્રાલમ્બવેણીયુતામ્ ।
ઈશત્ફુલ્લસુકેતકીવરદલૈરભ્યર્ચિતાં તાં શિવાં
તાં બાલાં ત્રિપુરાં શિવેનસહિતાં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૪॥

ચન્દ્રાદિત્યસમાનકુણ્ડલધરાં ચન્દ્રાર્કકોટિપ્રભાં
ચન્દ્રાર્કાગ્નિવિલોચનાં શશિમુખીં ઇન્દ્રાદિસંસેવિતામ્ ।
ભક્તાભીષ્ટવરપ્રદાં ત્રિનયનાં ચિન્તાકુલધ્વંસિનીં
મન્ત્રારાદિ વને સ્થિતાં મણિમયીં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૫॥

કલ્યાણીં કમલેક્ષણાં વરનિધિં વન્દારુચિન્તામણિં
કલ્યાણાચલસંસ્થિતાં ઘનકૃપાં માયાં મહાવૈષ્ણવીમ્ ।
કલ્યાં કમ્બુસુદર્શનાऽભયકરાં શમ્ભુપ્રિયાં કામદાં
કલ્યાણીં ત્રિપુરાં શિવેન સહિતાં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૬॥

કાલામ્ભોધરકુણ્ડલાઞ્ચિતમુખાં કર્પૂરવીટીયુતાં
કર્ણાલમ્બિતહેમકુણ્ડલધરાં માણિક્યકાઞ્ચીધરામ્ ।
કૈવલ્યૈકપરાયણાં કલમુખીં પદ્માસને સંસ્થિતાં
તાં બાલાં ત્રિપુરાં શિવેનસહિતાં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૭ ॥

નાનાકાઞ્ચિવિચિત્રવસ્ત્રસહિતાં નાનાવિધૈર્ભૂષિતાં
નાનાપુષ્પસુગન્ધમાલ્યસહિતાં નાનાજનાસેવિતામ્ ।
નાનાવેદપુરાણશાસ્ત્રવિનુતાં નાનાકલિદ્રપ્રથાં
નાનારૂપધરાં મહેશમહિષીં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૮ ॥

રાકાતારકનાયકોજ્વલમુખીં શ્રીકામકામ્યપ્રદાં
શોકારણ્યધનઞ્જયપ્રતિનિભાં કોપાટવીચન્દ્રિકામ્ ।
શ્રીકાન્તાદિસુરાર્ચિતાં સ્ત્રિયમિમાં લોકાવલીનાશિનીં
લોકાનન્દકરીં નમામિ શિરસા ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૯ ॥

કાઞ્ચીકિઙ્કિણિકઙ્કણાઞ્ચિતકરાં મઞ્જીરહારોજ્વલાં
ચઞ્ચત્કાઞ્ચનકિરીટકટિદામાશ્લેષભૂષોજ્જ્વલામ્ ।
કિઞ્ચિત્કાઞ્ચનકઞ્ચુકે મણિમયે પદ્માસને સંસ્થિતાં
પઞ્ચાદ્યઞ્ચિતસઞ્ચરીં ભગવતીં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૧૦ ॥

સૌવર્ણામ્બુજમધ્યકાઞ્ચિનયનાં સૌદામિનીસન્નિભાં
શઙ્ખંચક્રવરાભયાનિ દધતીં ઇન્દોઃ કલાં બિભ્રતીમ્ ।
ગ્રીવેયાસક્તહારકુણ્ડલધરાં આખણ્ડલાદિસ્તુતાં માયાં
વિન્ધ્યનિવાસિનીં ભગવતીં ધ્યાયામિ મૂકામ્બિકામ્ ॥ ૧૧ ॥

શ્રીમન્વિભવેન સુરૈર્મુનિગણૈરપ્સરોપાસ્ય સેવ્યાં
મન્ત્રારાદિસમસ્તદેવવનિતૈઃ સંશોભમાનાં શિવામ્ ।
સૌવર્ણામ્બુજધારિણીં ત્રિનયનાં મોહાદિ કામેશ્વરીં
મૂકામ્બાં સકલેશસિદ્ધિવરદાં વન્દે પરાં દેવતામ્ ॥ ૧૨ ॥

ઇતિ શ્રીમૂકામ્બિકાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Verses 1,2,3,6 and 7 together (with slight variation)
form Mookambika Pancharatna stotra.

*shrI mUkAmbikA stotra*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*